# धात्वर्थविमर्शः।

**लीला विहारी चौधरी**

**सदानन्द झा**

अथ[1] सकलब्दमूलभूतत्वाद्धात्वर्थो निरुप्यते। किन्तु स च स्फोटात्मकोऽयमेव। कस्तावत्स्फोट इत्याकाक्षायां स्फुटन्ति अर्था यस्मादिति स्फोट इति लक्षणरीत्या स्फोटस्तु, वर्ण, पद वाक्यभेदेन प्रथमं त्रिधात्वमपि जाति व्यक्तिभेदेन पुनः षोढाः। अखण्डपदस्फोटोऽवाक्यस्फोटोश्चेति संकलनया अष्टाविति।

वस्तुस्तु[2] सर्वन्नामधातुमाहत्यनुसारेण प्राधान्यात्। प्रथमं धातूनाम् अर्थन्निरूपयितारभत ग्रन्थकारः। तच्च-

3. फलव्यापारयोर्धातुराश्रयेतु ति स्मृताः।
फलेप्रधानं व्यापारस्तिऽर्थस्तु विशेषणम्।।

प्रस्तुतविषयप्रसङ्गे सर्वप्रथमं स्फोटो विविच्यते तत्र सभेद स्फोटनिरूपणेसति श्रीमतानागेशभट्टाख्येन परमलघुमञ्जूषायामित्थं विचारो विस्तारितः। तच्च- शास्त्रप्रक्रियानिर्वाहकोवर्णस्फोटः। प्रकृतिप्रत्ययस्ततदर्थ वाचका एवेति तदर्थः। उपसर्गनिपातधात्वादिविभागोऽपि काल्पनिकः। स्थानिनो लादयरादेशास्तिबादय कल्पिता एव। तत्र ऋषिभिस्स्थानिनां कल्पितार्थाः कण्ठरवेणैवोक्ताः। आदेशानान्तु स्थान्यर्थाभिधानसमर्थस्यैवादेशतेतिभाष्यात्रेऽर्थाः। एवञ्च स्थानिनांवाचकत्वमादेषानांवेति विचारो निष्फल एव कल्पितवाचकत्वस्योभयत्र सत्वात्। मुख्यं वाचकत्वन्तु कल्पनया बोधितसमुदायरूपे पदे वाक्येवा लोकानान्तत एवार्थबोधात्।

एवमेव स्फोटस्यार्थबोधजनकत्वात तेनैवाऽकांङ्क्षा निवृत्तेश्च वाक्यस्फोटस्य वाक्यस्फोटोऽतिनिष्कर्षे इत्यादिना सिद्धान्तयिष्यमाणत्वेऽपि प्रतिवाक्यं सङ्केतग्रहाऽसम्भवात् तदन्वाख्यानस्य लघूपायेन असूकरत्वाच्च। तत्र कल्पनया पदानि विभज्य तेष्वपिप्रकृतिप्रत्ययभागाँस्तथैव प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाम्यां तत्तदर्थेष्वपिप्रकृतिप्रत्ययानामनामनादिसङ्केतबोधनद्वारा साधुत्वान्वाख्यायके महर्षि प्रणीते शास्त्रे प्रक्रिया निर्वाहाय पदवर्णस्फोटावपि सम्मताविति दर्शयाँस्तिऽर्थन्तार्थप्रधाने सुप्तिङ्ख्यादिरूपे वाक्ये धात्वर्थस्य प्राधान्यतमेवादौ निरूपयितुमाह मूले-फलव्यापारयरिति। धातुरित्यत्र स्मृत इति वचनविपरिणामेनान्वयः। फलं विक्तियादिः।

अत्रापि धातुरित्यस्य स्मृता इति न विशेषणम्। विभिन्नवचनान्तोपस्थापितत्वात्। विशेष्यवाचकपदोतरविभक्तितात्पर्यविषयसंख्याविरूद्ध संख्याया अविवक्षायां विशेष्य-विशेषणवाचक पदयोसममानवचनकत्वनियमात्। अत एव नीलोघट इत्यादेर्न साधुत्वम्। तद्विवक्षायान्तु वेदाः प्रमाणं जात्याकृतिव्यक्तयः पदार्थाः इत्यादौ विभिन्नवचनत्वमपि न प्रकृते तद्विवक्षायां बीजमस्तीत्ययो वचन-विपरिणामेनान्वयं दर्शयति।

अस्तुसन्दर्भविषयममुम्पल्लवीकृत्य धात्वर्थः प्रस्तुतीक्रियते। तच्च-फलव्यापरयोर्धातूनां शक्तिरितिवैयाकरणाः मन्यते। फलाऽपेक्षया व्यापारस्य शाब्दबोधे कर्तरिकर्मणि च प्रत्यये उभयत्र प्राधान्यमिति प्राचीनवैयाकरणमतम्। नव्यास्तु [4] "सुपः आत्मनः क्यच्" इति भाष्यपर्यालोचनया कर्तृप्रतययस्थले व्यापारस्य कर्मप्रत्ययस्थने च फलस्यैव प्राधान्यम्।

फलाऽवच्छिन्ने व्यापारे व्यावाराऽवच्छिन्ने फलेच शक्तिरितिस्वीकारस्य कर्तृप्रत्ययकर्मप्रत्ययस्थलयोर्वशेषयविशेषणभावव्यासस्य शाब्दबोधेऽभ्युपगमेनावश्यक्तया गौखापत्तेः। अतः फले व्यापारेच एक वृन्तफलद्वयन्यायेन खण्डशः शक्तिम्मत्वाऽपतितं गौखं परिहरन्ति। यन्मते सर्वत्र व्यापार विशेष्यक एव बोधस्तन्मते फलावच्छिन्नेव्यापारे शक्तिकल्पननायामपि दोषाऽभावात्। तथा च खण्डशः शक्तिस्वीकारे कर्तृप्रत्ययस्थलकर्मप्रत्ययस्थलभेदेन विशेष्यविशेषणभावव्यत्यास मूलकश्शाब्दबोधभेदस्सौकर्येणोपपद्यते। फलावच्छिन्ने व्यापारे व्यापाराऽवच्छिन्ने फलेवा शक्तिकल्पानायान्तु उभयविधो बोधोन स्यात् तदुपपत्तये उभयविधशक्तिस्वीकारे गौखम्। तस्मात् खण्डशश्शक्तिरूचिता।

वस्तुतस्तु मीसांसकमण्डनमिश्रस्यमते फलं धात्वर्थो व्यापारस्तु तिङ् (आख्यातस्य) अर्थः। तेन शाब्दबोधोहि व्यापारमुख्य विशेषको जायते, किन्त्वन्येषाम्मते भावना आख्यातार्थः।शाब्दीभावना लिङ्गर्थो व्यापारो धात्वर्थ एव। एतेन प्रभाकरमतेऽपि भावना आख्यातार्थः। भावनामुख्यविशेष्यको बोधोभवति एतेषाम्मते।
तार्किकास्तु-फलव्यापारयोर्धात्वम्मन्यन्नेन।

कृतिश्चाख्यातस्याऽर्थः। शाब्दबोध एतन्मते "प्रथमान्तार्थमुख्यविशेष्यको भवति"। कर्तृप्रत्ययस्थले कर्ता प्रथमान्तार्थः, कर्मप्रत्ययस्थलेचकर्म प्रथमान्तार्थ इतिभावः कालस्तु व्यापारे एव सङ्गच्छते। सङ्ख्यापि च कर्तृप्रत्ययस्थले कर्तरि कर्मप्रत्ययस्थलेच कर्मणि बोध्यः।

यद्यपि प्राचीनवैयाकरणमते कर्तृप्रतेययस्थले कर्मप्रत्ययस्थलेच एकविधः शाब्दबोधः। सचेत्थम् चैत्रस्तण्डुलं पचतीत्यतः-तण्डुलाभिन्नाश्रयनिष्ठविक्त्तित्यनुकूलो-वर्तमानकालिक-एकत्व-विशिष्टचैत्राभिन्नाश्रयवृत्तिर्व्यापारः। चैत्रेण तण्डुलः पच्यते इत्यतोऽपि एवमेव।

नव्यास्तु-कर्तृप्रत्ययस्थले पूर्वोक्त एव। कर्मप्रत्ययस्थले च एकत्व विशिष्ट चैत्राभिन्नाश्रयवृतिर्वर्तमानकालिक व्यापारजन्या तण्डुलाश्रयाभिन्ननिष्ठाविकिलतिरिति फलविशेष्यको बोधः,किन्तु नैयायिकमते कृतिराख्यातार्थस्तत्र धात्वर्थोव्यापारो विश्लेषणम्। कृतिः सङ्ख्या च प्रथमान्तपदलाभ्येऽर्थेन्वेति। तथा च तण्डुलनिरूपिता धेयतावद् विकिलत्यनुकूलव्यापारानुकूलकृतिमान् एकत्वविशिष्टश्चैत्रः कर्मप्रत्ययेच एकत्वविशिष्टकृत्रिमच्चैत्रनिष्ठव्यापाराजन्य विकिलत्याश्रयस्तण्डुलः। उभयत्र प्रथमान्तार्थमुख्यविशेष्यकोबोधः।

तदेतन्मतद्वयमपि वैयाकरणेभ्योन रोचते। तथाहि फलमात्रस्य धात्वर्थत्वे ग्रामः संयोगवानितिवद् ग्रामो गमनवानि-त्यापि "स्यात भावार्थकल्युटा धात्वार्थमात्राभिधायितया संयोगरूप फलस्य ग्रामे सत्वातथा प्रयोगः प्रसज्यते। व्यापारस्य धात्वर्थत्वे प्रकृत्यर्थतया प्रकृतिप्रत्ययादौ" सहार्थं ब्रूतस्तस्योः प्रत्ययार्थःप्रधानमिति न्यायेन व्यापारमुख्याविशेष्येको बोधोन स्यात्। अतो व्यापारो न धात्वर्थ इतितेषामभिप्रायस्तन्नशोभनम्।

"प्रधान प्रत्ययार्थवचनमशिष्यमिति सूत्रयता सूत्रकारेणैव समाहितत्वात्। प्रत्ययार्थतया कस्यचित् प्राधान्येमिति नियमो नादरणीयो व्युत्पत्यनुसारित्वात् प्राधान्याऽप्राधान्यबोधस्य। "भावप्रधानमाख्यातमिति"निरूक्ताच्च क्रियाप्राधान्यमवसीयते।

पचतीत्यस्य "पाकं करोति" इति क्रियासामान्यार्थकेन करोतिना विवरणस्य दर्शनाद् व्यापारस्यारव्यातवाचित्वमिति नाशङ्कनीयम्। करोतिशब्देन पचधात्वर्थस्यैव विवरणन्नतु तिप्प्रत्ययार्थस्य। अन्यथा "पक्वान्"इत्यस्य 'पाकं कृतवान्' इति विवरणन्न स्यात्। आख्यातस्य तत्रानुपलब्धत्वात्। एवं फलमात्रस्यधात्वर्थत्वे क्रियावाचित्वाभावेन धातु संज्ञान स्यात्। भूवादयः इत्यनेन क्रियावाचिन एव धातुसंज्ञाविधानात्। न च तत्र सूत्रे क्रियापदेन फलमेव विगृह्यते, इतिफलरूप क्रियात्वं क्रियावाचित्वे सति भ्वादिगणपठित्वं धातुत्वमिति क्रियत्वज्ञानेन धातुत्वज्ञानस्य धातुत्वज्ञाने क्रियात्वज्ञानस्याऽपेक्षिततया अन्योन्याश्रयतापतेः। असमन्मते तु साध्यत्वेन प्रतीयमानत्वस्य तल्लक्षणस्य वक्तुं शक्यतया दोषाऽभावात्। तत्रप्रमाणं-

धात्वर्थं क्रियात्वञ्चेद्धातुत्वञ्च क्रियार्थता।

अन्योन्यसंश्रयस्स्पष्टस्तस्मादस्तु यथाकरम् (कारिकासंख्या-11)

नैयायिकास्तु फलव्यापारौ धात्वर्थौ इत्युभयपदं गम्यावपि आश्रयमाख्यातार्थं न मन्यते। तस्य प्रथमान्तपदेन लाभात्। अनन्यलभ्यस्यैवार्थस्य शब्दार्थत्वाऽभ्युपगमेन कृतिरेवारव्यातार्थः [7] लःकर्मणि...... इति सूत्रे कर्तृकर्मपदे भावप्रधान निर्देशात कर्तृत्वकरमत्वपरे। यथा- "द्वयेकयोर्द्विवचनैकवचने" इति सूत्रे द्वयेकयोरिति पदं द्वित्वैकत्वपरम्। अतएव द्वित्वसंख्यायां द्विवचनम् एकत्व संख्ययामेकवचनं सिद्धयति न तु द्वित्ववाति एकत्ववति वा। तथेहापि कर्तृत्वं कृतिः कृत्याश्रयस्य कर्तृत्वेन तत्र प्रकारीभूतायाः कृतेः भावप्रत्ययेन वाच्यतया तल्लाभात्।

नचकर्तरिकृदिति से कर्तृपदस्य धर्मपरतैववेद्यते। अन्यथा-पाचको देवदत्त इत्यादौ अभेदान्वय बोधोन स्यात्। न हि कर्तृत्वदेवदतयोदभेद कर्त्ता सह देवदत्तस्य तु यथा। तथा च अर्थाधिकारानुरोधेन कर्तृपदमिहानुवर्त्तमानं तादृशव्याख्याने बाधकाऽभावत्। शब्दाधिकारे पूर्वार्थापेक्षतया भिन्नार्थकत्वमपि अनुवृत्तपदस्येष्यते।

वस्तुतोनेदम्मतं युक्तम्। सत्येव प्रमाणे शब्दाधिकारा-श्रयणम्। अत एव "ष्णान्ता षडिति" सूत्रे नचान्यार्थं प्रकृतमनुवर्त्तनादन्यद् भवति। नहि गोधा सर्पन्तीह सर्पाणादहिर्भवति इत्युक्तं भाष्ये। यादृशार्थकं पदं पूर्वत्र तादृशार्थकमेवोत्तरपि चेतस्वीक्रियते उपस्थितेः योग्यायादिज्ञानस्यच वैचित्र्यन्न कल्पनीय भवतीति लाघवम्। अन्यादृशार्थककल्पनायान्तु अन्यादृशोपस्थित्यादिकल्पलाप्रयुक्तं गौरवमापद्येत्। अतः अर्थाधिकारः प्रायेण स्वीक्रियते। तथा च 'लः कर्मणि' इति सूत्रे कर्तृपदस्य कर्तृत्वपरतया व्याख्यानं नोचितम्।

किञ्च "पचन्तं चैत्रं पश्येत्यादौ लादेशा विशेषात् तिबादीनामिव शर्तृशानजादीनामपि कृतिवाचकत्वापत्तेः। शत्रन्तादेः देवदत्तादिना सममभेदान्वयस्यैव बोधादिष्टापत्तेः कर्तुमशक्यत्वात्।

एवमेव कृतिवाचकत्वेऽभिधानानभिधानव्यवस्थापि उच्छिद्यते। देवदत्तः पचतीत्यादौ तिङ्कृतेरूक्तत्वेऽपि कर्तुरनुक्तत्वात् तृतीयापत्तेः। न च कर्तृकरणयोस्तृतीयेत्यत्रापि कर्तृपदस्य कर्तृत्वपरतां बुध्वार्तृनुक्तायां कृतौ

तृतीयेत्यर्थाश्रयणेन आख्यातेन प्राधान्येन कृत्प्रत्ययस्थले च अप्राधान्येन कृतरूक्ततया तृतीयापत्तेर्वारयितुं शक्यत्वादिति युक्तम्। "रथो गच्छति" तण्डुलः पच्यते स्वयमेवेत्यादौ रथादावचेतनेकृतेर्बाधाल्लक्षणया आश्रयोबोध्यते। तथा च कृतेरनुक्तत्वात् तृतीयाविभक्तेर्दुर्बारत्वात्। तथाकालस्य समानप्रत्ययोपात्तत्वात् क्वचित्कृतौ क्वचिच्च धात्वर्थव्यापारेऽन्वयो वाच्यः। एवञ्चाख्यातार्थकालनिष्ठप्रकारता निरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वाऽवच्छिन्नम्प्रति आख्यातजन्यकृत्यु पस्थितिर्धातुजन्यव्यापारोपस्थितिश्चकारणम्। शाब्दबोधेपरस्परव्यभिचारवारणाय अव्यवहितोत्तरत्वनिवेशे सुतरां गौरवम्।

प्रथमान्तार्थमुख्यविशेष्यको बोधोपि नैयायिकानां न युक्तिस्सहः। मृगस्योत्कटधावनक्रियाम्प्रति दिदशयिषुः कश्चिदाहपश्य मृगो धावति। अत्र वाक्ये त्वन्मते कृतिमन्मृगस्य प्रधानवाक्यार्थत्वेन प्रतीयमानस्य दर्शनकर्मतयाऽन्वये शातृप्रत्ययापत्तेः तदनुरोधिन्या द्वीतीयायाश्चापत्तेः। न च तमिति पदमध्याहृत्य सः दोषः परिहरणीयः। वाक्यभेदापत्या भाष्यसिद्धैकवाक्यता भंगापत्तेः। प्रतितिपादयिषिताया उत्याटधावनक्रियया: बोधयितुमशक्यत्वाच्च यद्यपि प्रथमान्तार्थमुख्यविशेष्यक बोधाभ्युपगमे-1.

स्वारोचिषेन्तरे पूर्वं चैत्रवंश समुदभवः।

सुरथोनाम राजाऽभूत समस्ते क्षितिमण्डले।।

इत्यत्र तच्छब्देन सुरथस्य राज्ञः शाब्दबोथे प्राधान्यात् आञ्जस्येन परामर्श उपापद्यते, सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शितवात्। क्रियाप्राधान्यो नैतद् युज्यते। तथापि अस्मिनपक्षे- हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्।

इत्यत्र तच्छब्देन ग्रसनक्रियायाः अप्राधान्यात् परामर्शोन स्यात् इति समानमेव। वस्तुतस्तु शाब्दबोधीया मुख्याविशेष्यता न गृह्यते, किन्तु शक्रव्यादिग्रहेषु मुख्यविशेषत्वेनाभिमतः । अत एव शब्दानुशासनं केषां शब्दानामित्पाद्यपि सङ्गच्छते।

क्रियाप्राधान्यादेव "पचतिभवति" अत्रपचयादयः क्रियाः भवन्ति क्रियायाः कर्योभवन्ति इति क्रियान्वयोऽभ्युपेतो भगवता भाष्यकृता। अत एव च-

लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनंनभः।

असत्पुरूषसेवेव दृष्टिर्निषफलितां गता ।।

इत्यादौ लेपनादितया व्यापनादिसम्भाव्य उत्प्रेक्षितं सुसङरातं भवति। तस्माद्व्यापारमुख्यविशेष्यको बोधो हि युक्तिसंगतः


सन्दर्भक्रमांकाः निम्नाङ्तकितास्सन्ति।

परमलघुमञ्जूषा (धात्वर्थनिरूपणम्)।

निरूक्तम्।

वैयाकरणभूषणसारः।

सिद्धान्तकौमुदी।

निरूक्तम्+परमलघुमञ्जुषा।

वैयाकरणभूषणसारः(का0 सं-11)

लघुसिद्धान्तकौमुदी।

सिद्धान्तकौमुदी।

अष्टाध्यायी+मध्यसिद्धान्तकौमुदी

श्रीमद्दुर्गासप्तशती (अ0 -01 श्लो-04)।